सीमन्तोन्नयनं, क्ली, (सीमन्तस्य उन्नयनं उत्तो-
लनं यत्र ।) संस्कारविशेषः । इति जटाधरः ॥
तद्विधानञ्च यथा,—
अथ सीमन्तोन्नयनम् ।
"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने
प्रायश्चित्तात्मकमहाव्याहृतिहोमं कृत्वा पुंस-
वनञ्च कृत्वा सीमन्तोन्नयनं कार्य्यम् । तथा च
नारदः ।
'येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात् ॥
अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः ॥
क्रमात् भ्रातॄणां संस्काराणाञ्च पौर्व्वापर्य्यक्रमात्
भ्रातृक्रमस्तु सोदरविषय एव । विवाहे तथा
दर्शनात् । छन्दोगपरिशिष्टम् ।
देवतानां विपर्य्यासे जुहोतिषु कथं भवेत् ।
सर्व्वं प्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः ॥
संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथञ्चन ।
हुत्वैतदेव कुर्व्वीत ये तूपनयनादधः ॥'
एतदित्यनेन सर्व्वं प्रायश्चित्तमनुकृष्टं तच्च प्रागेव
विहितम् । उभयकरणे तन्त्रेणैव मातृका-
पूजादि ।
'गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत् ।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु ॥'
इति छन्दोगपरिशिष्टात् ॥ * ॥
गोभिलः । अथ सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे
मासि षष्ठेऽष्टमे वा । अथ पुंसवनानन्तरम् ।
सीमन्तः केशरचनाविशेषः । वाशब्देनात्र चतु-
र्थादिमासानां तुल्यवद्विकल्पः । किन्तु पूर्व्वपूर्व्व-
कालः प्रशस्तः । समर्थस्य क्षेपायोगात् इति
न्यायात् । ततश्च नवममासादौ प्रायश्चित्तं कृत्वैव
कर्त्तव्यम् । प्रथमगर्भे इत्युपादानात् । यदि
कथञ्चिदकृत एतस्मिन् संस्कारे गर्भनाशे पुन-
र्गर्भोत्पत्तौ अयं कालनियमो न किन्तु गर्भस्पन्दने
सीमन्तोन्नयनं यावन्न बालप्रसवः । इति शङ्ख-
लिखितोक्तकालो ग्राह्यः । हद्दराजमार्त्तण्डे ।
'या नार्य्यकृतसीमन्ता प्रसूते च कथञ्चन ।
अङ्के विधाय तं बालं पुनः संस्कारमर्हति ॥*॥
षष्ठे मासेऽष्टमेऽप्यकुजदिनकृतां नन्दभद्रे
तिथौ चे-
मैत्रे मूले मृगाङ्के करपितृपवने पौष्णविष्णुत्रियुग्म-
पुष्याश्वादित्यरौद्रे युवतिहरिभसे द्व्यङ्गके वापि
लग्ने ।
चन्द्रे तारानुकूले शुभमपि नियतं स्याच्च
सीमन्तकर्म्म ॥
मृगाजरहिते लग्ने नवांशे पुंग्रहस्य च ।
केचिद्वदन्ति सीमन्तं तथा रिक्तेतरे तिथौ ॥
गोभिलः । प्रातः सशिरस्काप्लुतोदगग्रेषु दर्भेषु
पश्चादग्नेः प्राच्युपविशति उक्तार्थमेतत् । पश्चात्
पतिरवस्थाय युगमन्तमौडुम्बरं शलाटुग्रथ्नमाव-
ध्नाति अयमूर्ज्जावतो वृक्ष इति । अग्नेः पश्चात्
पतिः स्थित्वा । युगानि फलानि यस्मिन् शला-
टुग्रथ्ने नीलस्तवके स युगमान् तं मतुवन्तम् ।
तथा च भट्टनारायणधृतं छन्दोगपरिशिष्टम् ।
'शलाटु नीलमित्युक्तं ग्रथ्नस्तवक उच्यते ।
कपुष्णिकाभितः केशा मूर्द्ध्नि पश्चात् कपुच्छलः
एतद्वचनं नारायणोपाध्यायेन धृतम् । उडु-
म्बरभवमौडुम्बरम् । अयमूर्ज्जावतो वृक्ष इति
मन्त्रेण भार्य्यायाः कण्ठे बध्नाति ॥ * ॥ अथ
सीमन्तमूर्द्ध्वं नयति भूरिति दर्भपिञ्जलीभिरेव
प्रथमं भुव इति द्वितीयं स्वरिति तृतीयम् ।
अथानन्तरं यत्र सिन्दूरं स्त्री ददाति तं सीमन्तं
ललाटोर्द्ध्वं नयति भूरिति मन्त्रेण दर्भपिञ्जली-
भिस्तिसृभिः । एकवारकरणाद्यावन्त्युन्नयनानि
तावतीभिरेव तिसृभिरित्यर्थः । प्रथमादिपदानि
तु व्याहृतीनां पिञ्जलीनाञ्च पृथङ्नियोगार्थम्
पिञ्जली पवित्रम् । तथा च छन्दोगपरिशिष्टम्
'अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ।
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम् ॥'
गोभिलः । अथ वीरतरेण येनादितेरित्येतयर्चा
वीरास्तरन्त्यनेन युद्धमिति वीरतरः शरः ॥
तथा च छन्दोगपरिशिष्टम् ।
'श्वाविच्छलाका शलली तथा वीरतरः शरः ।
तिलतण्डुलसम्पाकः कृशरः सोऽभिधीयते ॥'
ततश्च शरेण येनादितेरिति मन्त्रेण सीमन्तमूर्द्ध्वं
नयति इति पूर्व्वसूत्रादनुवर्त्तते ॥ * ॥ अथ
पूर्णेन सूत्रचात्रेण राकामहमित्येतयर्चा । चात्रं
तर्कुः । तेन सूत्रपूर्णेन राकामहमिति मन्त्रेण
सीमन्तमूर्द्ध्वं नयतीति शेषः । त्रिः श्वेतया
शलल्या यास्ते राके सुमतय इति, स्थानत्रितये
शुक्लेन शेजाजन्तुकण्टकेन यास्ते इति मन्त्रेण
सीमन्तमूर्द्ध्वं नयतीति शेषः । कृशरः स्थाली-
पाक उत्तरघृतस्तमवेक्षयेत् । कृशर उक्तः ।
स्थालीपाकश्चरुः स उपरि दत्तघृतस्तं वध्वाः
प्रदर्शयेत् । स्थालीपाकपदं चरुस्थाल्यां कृश-
रस्य श्रपणार्थम् । मनुष्यार्थत्वात् त्रिःप्रक्षालनम्
ततश्च यः कश्चिन्महानसे श्रपयित्वा स्थापयेत् ।
किम्पश्यसीत्युक्त्वा प्रजामिति वाचयेत् किं पश्य-
सीति पतिरुक्त्वा प्रजामित्यादि सर्व्वं गर्भिणीं
वाचयेत् । तं सा स्वयं भुञ्जीत । तमेवेक्षितं
कृशरम् । वीरसूर्जीवसूर्जीवपत्नीति ब्राह्मण्यो
मङ्गल्यादिभिर्व्वाग्भिरुपासीरन् । वीरान् विक्रा-
न्तान् पुत्रान् सूत इति वीरसूस्त्वं भवेति वाक्य-
शेषः प्रतिपदं स्यात् । जीवतो दीर्घायुषः
पुत्रान् सूत इति जीवसूः जीवतः पत्नी जीव-
पत्नी अविधवेत्यर्थः । एवं प्रकाराभिर्व्वाग्भि-
रनुनयेयुः । क्रमश्च महाव्याहृतिभिर्हुत्वा
औडुम्बरफलस्तवकं कण्ठे बद्ध्वा प्रजामिति
वाचयेदित्यन्तं तन्त्रं कृत्वा व्याहृतिभिर्होमादि-
तन्त्रं समापयेत् ततो ब्राह्मण्य उपासीरन् ।"
इति संस्कारतत्त्वम् ॥
सीमा,[न्] } स्त्री, (सीयते इति । सि + "नामन्-
सीमा, } सीमन्व्योमन्निति ।" उणा० ४ । १५० ।
इति मनिन्प्रत्ययेन साधुः । "डाबुभाभ्याम-
न्यतरस्याम् ।" ४ । १ । १३ । इति पाक्षिको डाप् ।)
ग्रामादीनामवधारितान्तभागः । सीमाना इति
भाषा । तत्पर्य्यायः । मर्य्यादा २ अवधिः ३
आघाटः ४ । इति जटाधरः ॥ (यथा, मनुः ।
८ । २५३—२५४ ।
"यदि संशय एव स्यात् लिङ्गानामपि दर्शने ।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः ॥
ग्रामीयककुलानाञ्च समक्षं सीम्नि साक्षिणः ।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥")
क्षितिः । (यथा, माघे । ३ । ५७ ।
"यस्यामजिह्मा महतीमपङ्काः
सीमानमत्यायततोऽत्यजन्तः ।
जनैरजातस्खलनैर्न जातु
द्वयेऽप्यमुच्यन्त विनीतमार्गाः ॥")
क्षेत्रम् । अण्डकोषः । इति मेदिनी ॥ (यथा,—
"केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥"
इति सिद्धान्तकौमुदी । २ । ३ । ३६ ॥)
वेला । इति विश्वः ॥
सीमाविवादः, पुं, (सीमायाः विवादः ।) ग्रामा-
दीनां सीमाविषयककलहः । यथा । अधुना
सीमाविवादनिर्णय उच्यते ।
"सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः
गोपाः सीमाकृषाणा ये सर्व्वे च वनगोचराः ॥
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः ।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम् ॥"
ग्रामद्वयसम्बन्धिनः क्षेत्रस्य सीम्नो विवादे तथैक-
ग्रामान्तर्व्वर्त्तिक्षेत्रमर्य्यादाविवादे च सामन्ता-
दयः स्थलाङ्गारादिभिः पूर्व्वकृतैः सीमालक्षणै-
रुपलक्षितां चिह्नितां सीमां नयेयुः निश्चिनुयुः
सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा । जन-
पदसीमा १ ग्रामसीमा २ क्षेत्रसीमा ३ गृह-
सीमा ४ चेति । सा च यथासम्भवं पञ्चलक्षणा
तदुक्तं नारदेन ।
"ध्वजिनी मत्सिनी चैव नैधानी भयवर्ज्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता ॥"
ध्वजिनी वृक्षादिलक्षिता । वृक्षादीनां प्रकाश-
कत्वेन ध्वजतुल्यत्वात् । मत्सिनी सलिलवती
मत्स्यशब्दस्य स्वधारजजलपरत्वात् । नैधानी
निखाततुषाङ्गारादिमती । तेषां निखातत्वेन
निधानतुल्यत्वात् । भयवर्जिता अर्थिप्रत्यर्थि-
परस्परसम्प्रतिपत्तिनिर्म्मिता । राजशासन-
नीता । ज्ञातृचिह्नाभावे राजेच्छया निर्म्मिता
एवम्भूतायां षोढा विवादः संभवति । यथाह
कात्यायनः ।
"आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च
अभोगभुक्तिः सीमा च षड्भूवादस्य हेतवः ॥"
इति । तथा हि । ममात्र पञ्चनिवर्त्तनाया भूमे-
रधिका भूरस्तीति केनचिदुक्ते पञ्चनिवर्त्तनैव
नाधिकेत्याधिक्ये विवादः । पञ्चनिवर्त्तना मदीया
भूरित्युक्तेन ततो न्यूनैवेति न्यूनतायाम् । पञ्च-
निवर्त्तनो ममांश इत्युक्तेऽंश एव नास्तीत्यस्ति-